लभलतरिपकभस्यशुकृत मम पाकमुपेत्वमुना कुशल

समाप्तोयं पाकविधिर्नामानेकरोगप्रशमनः ॥ कृतिरियं पण्डितश्रीदिवाकरचन्द्रस्येति ॥ लिखितमिदं श्रीराघवजीवेन स्वपरार्थहेतुना ॥

पारमितापरिकथा
सुभाषितरत्नकरण्डकम्

क्रमाङ्कः तृ ६२७ विषयाङ्कः ८०

ग्रन्थकारः आचार्यः शूरपादः। नेपालीयं कागतम्। नेवारीलिपिः। पङ्क्तयः ६।
आकारः ११½×३। ग्रन्थसंख्या २५० । पत्रसंख्या १८ । पूर्णा।

आदिवाक्यम

ॐ नमो वुद्धाय ॥
मानुष्यं समवाप्य दुस्करशतैर्लब्ध्वा दुरापं क्षणां
मृत्यौ निष्प्रतिकारदारुणतरे नित्यं पुरस्थायिनि
पाथेय दमदानसंयममय यैर्न प्रभूतं कृतं
संसारोग्रमनुप्रपातपतिताः प्राप्स्यन्ति दुःखानि ते ॥
मानुष्यं दुर्लभं प्राप्य विद्युत्सपात चञ्चलम्।
भवक्षये मति कार्या भवोपकरणेषु वा ॥
मनुष्यत्व समासाद्य विद्युज्ज्वालाग्निरतल
पुण्यमेवात्र कुर्वीत यतश्चिन्तामणिर्नृणाम् ॥

पुष्पिकावाक्यानि

इति धर्मश्रायणप्रोत्साहनकथा
" पुष्प प्रोत्साहनकथा
" दुर्लभमनुष्यकथा
" दानकथा
" पुण्यकथा
" विम्बकथा
इति स्नानकथा
" कुङ्कुमादिकथा
" छत्रकथा
" धातत्रारोपण कथा
" मण्डलकथा
" भोजन कथा

इति यानकथा	इति क्षेत्रकथा
" पुष्पादिकथा	" विचित्रकथा
" प्रणामकथा	" शीलकथा
" उज्ज्वालिका दानकथा	" क्षान्तिकथा
" प्रदीपकथा	" वीर्यकथा
" विहारकथा	" ध्यानकथा
" शयनासनदानकथा	" प्रज्ञाकथा

अन्त्यवाक्यम —

स्वर्गापवर्गगुणरत्ननिधानभूता
एता षडेव भुवि पारमिता नराणां
ज्ञात्वा नरः स्वहितसाधनतत्परःस्यात्
कुर्यान्तकः सततमाशु दृढं प्रयत्नम् ॥ ॥

इति पारमितापरिकथा सुभाषितरत्नकरण्डके समाप्ता । कृतिराचार्यशूरस्य ग्रन्थप्रमाणमस्य शतं ।

पारमितापरिकथा
(सुभाषितरत्नकरण्डकम्)

क्रमाङ्कः प्र ११२३ विषयाङ्कः ८१

ग्रन्थकारः। आचार्यः शूरपादः। नेपालीयं कागतम्। नेवारीलिपिः। पङ्क्तयः ६। आकारः १२×३½। ग्रन्थसंख्या २५५। पत्रसंख्या २०। अन्त्यखण्डिता।

पालिभाषायां विनयः

क्रमाङ्कः तृ ७३७ विषयाङ्कः ८२

ग्रन्थकारः। ताडपत्रानि । लिच्छवीलिपिः । पङ्क्तयः ७।
आकारः१६$\frac{3}{4}$×१$\frac{7}{8}$ । ग्रन्थसंख्या १००। पत्रसंख्या ४। प्रकीर्णपत्रम् ।

पिण्डपात्रावदानम्

क्रमाङ्कः तृ २९५ विषयाङ्कः ८३

ग्रन्थकारः। नेपालीयं कागतम्। नेवारीलिपिः। पङ्क्तय ८।
आकारः १२$\frac{3}{4}$×२$\frac{1}{2}$। ग्रन्थसंख्या ३२५। पत्रसंख्या २१। पूर्णम्।

आदिवाक्यम् —

नमः श्री शाक्यमुनये ॥
जिनः श्री भगवान्बुद्धो विहारे मणिमण्डिते ।
जेतवने स्वशिष्यैः ससार्द्धं च विजहार स ॥
अनेकैर्बोधिसत्वैश्च वहुप्रत्येकवुद्धकैः
श्रावकै जिनशिष्यैश्च भिक्षुभिक्षुण्युपासकैः ॥
देवपुत्रगणैः सार्द्धं ब्रह्मभिश्च महोत्तमैः
चतुर्भिश्चमहाराजैरहिराजगणेश्वरैः ॥
किन्नरैन्द्रैश्चदैत्यैन्द्रै गरुडैश्च महोत्तमैः ।
मष्यैनुर्मनुजेन्द्रैश्च राजामात्यगणैस्तथा ॥
धनिभिः सार्थवाहैश्च पौरैश्च जिनसंघकैः ।
ब्रह्माविष्णुशिवशक्रै रप्सरासिर्ममनोरमै ॥

अन्त्यवाक्यम् —

अथ श्री भगवान्बुद्धः सर्वसत्वानुकंपकः
जयिमत समालभ्य वोधिसत्वानूवाच स ।।

पुण्यार्थिकेन जयमते कुलपुत्रेण कुलदुहिता वा तथागतः पूजयित व्यः । ज्ञानार्थिकेन श्रुताभियोगः करणीय । भोगार्थिकेन त्यागो वृंहयितव्यः ।। स्वर्गार्थिकेन क्षान्तिर्भाव-यितव्या । प्रतिहा(ज्ञा) नार्थिकेन सद्गुणमोखं कर्तव्यं । धारणार्थिकेन निराभात्मना भवितव्यं । सुखार्थिकेन सर्वपापानि विरमाति भावयितव्यानि ।। सत्वानां सुखार्थिकेन वोधिचित्तमुत्पादयितव्यं । मञ्जु स्वरार्थिकेन सत्यवादिना भवितव्यां गुणार्थिकेन कल्याण मित्राणि सेवितव्यानि ।। शमणार्थिकेन सत्संगवहुलेन भवितव्यं । विपश्चनार्थिकेन शून्यताधर्मप्रत्यवेक्षणा वहुलेन भवितव्यं । ब्रह्मलोकार्थिकेन मैत्री करुणा मुदितोपेक्षा भावयितव्या ।। देवमनुष्य सम्पदर्थिकेन दशकुशलकर्मपथाः समादापयितव्या ।। परि-निर्वाणार्थिकेन श्रुत्वा ज्ञानाभियोगः करणीयः ।। सर्वगुणार्थिकेन त्रिरत्नानि पूजयित-व्यानि ।। इदमवोचद्भगवानात्तमना सा च सर्वावती पर्षत्ते च सर्ववोधिसत्वाः सदेवमा-नुषासुरगन्धर्वश्च भगवतो भाषितमभ्यनन्दन्निति इति पिण्डपात्रावदानं समाप्त ।

समयः — संवत् ७७६ आषाढशुक्ले दशम्यां संलिखिता समाप्ताभूत् ।

पिण्डपात्रावदानम्

क्रमाङ्क तृ २६० विषयाङ्क ८४

ग्रन्थकारः । नेपाली कागतम् । नेवारीलिपिः पङ्क्तयः ६ । आकारः ६^{४} × ३^{३} ।
ग्रन्थसंख्या ३२५ । पत्रसंख्या २१ । पूर्णम् ।

पिण्डपात्रावदानम्
(संक्षिप्तम्)

क्रमाङ्कः तृ ५६२ विषयाङ्कः ८५

ग्रन्थकार । नेपालीयं कागतम् । देवनागरीलिपिः । पङ्क्तय १० ।
आकार १२॥×६१ । ग्रन्थसंख्या १२६ । पत्रसंख्या ६ । पूर्णम् ।

पिण्डपात्रदानगाथा

क्रमाङ्कः तृ ३६४ विषयाङ्कः ८६

ग्रन्थकारः । नेपालीयं कागतम् । । नेवारीलिपिः । पङ्क्तयः अनियताः ।
आकारः ३१×२॥ । ग्रन्थसंख्या ५६ । पत्रसंख्या व्याससफू । पूर्णा ।

प्रज्ञापारमितामूलहृदयं

क्रमाङ्कः तृ ६५६ विषयाङ्कः ८७

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ८ । आकारः २१ ×४३ ।
ग्रन्थसंख्या १००० । पत्रसंख्या ४६ । पूर्णम् ।

प्रज्ञापारमितार्धशतिका

क्रमाङ्कः द्वि २३६ विषयाङ्कः ८८

ग्रन्थकारः । नेपालीयं कागतम् । सुवर्णरजतरञ्जनाक्षरः । पङ्क्तयः ५ ।
आकारः १४×३ । ग्रन्थसंख्या ४७ । पत्रसंख्या ४ (१६४-१६७) । पूर्णा ।

प्रज्ञोपायविनिश्चयसिद्धिः

क्रमाङ्कः तृ ३६६ विषयाङ्कः ८६

ग्रन्थकारः अनङ्गवज्रपादः। ताडपत्राणि। भुजवलाक्षरः। पङ्क्तयः ६।
आकारः१२×२। ग्रन्थसंख्या १०७। पत्रसंख्या ६ (१६-२४) आदिखण्डिता।

प्रतिपत्तिसारशतकम्

क्रमाङ्कः प्र १६६७ विषयाङ्कः ९०

ग्रन्थकारः आर्यदेवपादः। ताडपत्राणि। प्राचीननेवारीलिपिः। पङ्क्तयः ७।
आकारः११½×२॥। ग्रन्थसंख्या ५०। पत्रसंख्या ३। आदिखण्डिता।

प्रतिष्ठालोकः

क्रमाङ्कः तृ १९१ विषयाङ्कः ९१

ग्रन्थकारःकल्याणश्रीमित्रः। ताडपत्राणि। नेवारीलिपिः। पङ्क्तयः ६।
आकारः ११×२। ग्रन्थसंख्या ५००। पत्रसंख्या ३३। खण्डितः।

आदिवाक्यम् —

नमः श्री वज्रसत्वाय।

नत्वा वज्रपरम्महोत्तरसुखं शान्तन्त्रिकायात्मकं
नानामण्डलचक्रविम्ब्वविसरैः सत्वार्थसम्पादकं
मन्दानां सुखवोधमात्मसद्द———प्रतिष्ठाविधौ
साम्नायं क्रमतो मया गुरुमतं किञ्चित्समालिख्यते॥

अन्त्यवाक्यम् —

गुरुश्चन ययाम्बुधौ निमज्यामृतमुपरीतमिदम्मया सुधोराः।
पदमुरुकरुणागुणस्य लब्धं परमहितं सहसा सुमभजन्ताम्॥
वज्रावलात्तदुपराणि विलोक्य यत्ना –
देतन्मया विलिखितास्मितमानसेभ्य ः।
तृषास्तत्वस्य शनैः शरदिन्दुशुभ्रै –
र्लोकाधुना विगतदोषगुणाः स्वयम्भू ;
समाप्तोयङ्कल्याणश्रीमित्रोद्धृतः प्रतिष्ठालोक; इति ॥

समयः— विख्याते त्रिशवरशवान (ण)युते नेपालसंवत्सरे माघमासे श्रीगुन(ण)कामदेवराजे कल्याणेन हिरण्यवर्णसुगतवासर्स्थितेन समन्तभद्रेण स्वयं लेखि ।

प्रतिशरास्तुतिः
(भद्रकल्पावदानान्तर्गता)

क्रमाङ्कः तृ ७८२ विषयाङ्कः ९२

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ५ ।
आकारः ६ × ३ । ग्रन्थसंख्या ४० । पत्रसंख्या ६(२४–२९) । पूर्णा ।

प्रत्यङ्गिरास्वदेहसर्वरक्षादिधारणीसङ्ग्रहः

क्रमाङ्कः प्र. १४११ विषयाङ्क ९३

ग्रन्थकारः । नेपालीयं कागतम् । देवनागरीलिपिः । पङ्क्तयः ८ ।
आकारः ८¾ × ३½ । ग्रन्थसंख्या ११४ । पत्रसंख्या २० । पूर्णः ।

प्रव्रज्याग्रहणविधिः ने. भा. स.
(वड़ेछुयेगु)

क्रमाङ्कः च १०३२ विषयाङ्कः ६४

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ६ । आकार ६×३
ग्रन्थसंख्या २७० । पत्रसंख्या ठ्यासफू । पूर्णा ।

आदिवाक्यम् —

ॐ नमो वुद्धाय ॥

अथ प्रवज्याग्रहणमुच्यते । न्ह्यथुकुन्हु दुशरक्रियास । ऋचास्यं गुरुमण्डल त्रिसमाधि, कलशाधिवासन, देवपूजा ॥ थन वदेच्छुयपनि रस्वम्यं स्वस्तिकस सोस्यं गुरुमण्डलदनके, शिष्याधिवासन, निलाञ्जन, लोहाग्निरक्षा . कलशाभिषेक विय सुवस्ति वाक्येन थकाडिने लु. आगणस सघाचके । थलपा जुस्यं मण्डलथिरके सकरस्यन स्वान ताने सग्वन तेके भो विय, दक्षणापूजा आशिर्वाद विसर्जन इतिदूसर क्रियाविधि ॥ सन्ते वदेछुयकुन्हु नकसं चैत्यभरा, प्रज्ञापारमिता लोकेश्वर, पिव समुद्र, चाकलस, सग्वन, चीवर रुचिगा, क्षिजलग्वरपात्र, खिस्किरिका, कुन्धार चन्द्रमाचोया थार भू देशवलि थापरपे ॥

अन्त्यवाक्यम् —

मण्डलथिरे, स्वानतने, सकलस्यनं कितने । पूर्णायाथ पूर्णाहुति शिष्याहुति पाठ समाप्त ॥ सग्वनतयके, दक्षणापूजा. आशीर्वाद, कलशाभिषेक सेखाहुति (शेषाहुति) विसर्जन मण्डलपात्रान् कलेशनां ल्हाय ॥ इनाशरिते जक्षजक्षिणी ल्हांय नागपो पूजहाय ॥ देशवलिडायकं छोय, देशजात्रा वने देशवलि, लिहाओयकाओ ओने । लशोस्यं दुकाय, सग्वन विय राजस आदिनं । पिण्डपात्रस फोनके पारनयात करच्छोय ॥ इति प्रव्रज्या-ग्रहणविधिः समाप्ता ॥

प्रव्रज्याग्रहणविधिः (ने. भा. स.)
(वड़ेछुयेगु) देवप्रतिमालक्षणशास्त्रं च

क्रमाङ्कः च १०३३ विषयाङ्कः ९५

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः १० ।

आकारः ८½×३ । ग्रन्थसंख्या २७० । पत्रसंख्या ख्यासफू । पूर्णा ।

समय :—

शुभ सम्वत् ७४६ ज्येष्ठ कृष्णा त्रयोदशि आदित्यवारे ।

प्रश्नगुटिका तारादर्शन-
फलञ्च (ने.भा.)

क्रमाङ्कः च १०३३ विवयाङ्क ९६

ग्रन्थकारः। नेपालीयं कागतम् । नेवारीलिपिः। पङ्क्तयः७ । आकारः ७×३।

ग्रन्थसंख्या ३१२ । पत्रसंख्या ख्यासफू । अन्त्यखण्डितम् ।

प्रायश्चितविधिः शौचारश्च

क्रमाङ्कः प्र ११०३ विषयाङ्क ९७

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः। पक्तय: ८ ।आकार १८½×४½ ।

ग्रन्थसंख्या ३५० । पत्रसंख्या ९ । पूर्णा ।

प्रावृतराजम् (अचिन्त्याद्वयक्रमोपदेशः)

क्रमाङ्क तृ ७५५ विषयाङ्क ६८

ग्रन्थकारः कुद्दालपादः । नेपालीयं कागतम् । देवनागरीलिपिः । पङ्क्तयः ११ ।
आकारः ११॥×४३। ग्रन्थसंख्या १२५ । पत्रसंख्या ४ (१५—१८) । पूर्णः ।

आदिवाक्यम्-

ॐ नमो वज्रसत्वाय ॥
प्रज्ञाग्रगर्भसंभूतं अचिन्त्यमद्वयं विभुम ।
प्रणम्य लिख्यते सम्यक् भद्रपादक्रमागते ॥
प्रज्ञोपायमहागुहचं करुणाचिन्त्यलक्षणम्
स्वयमुत्पद्यते ज्ञानं वाक्यथातीतगोचर ॥
न चासौ भावरूपेण स्वयंभूरद्वयोत्तमम् ।
न चाभावेन दृश्यन्ते वोधिसत्वाः सवज्रिणः ॥

अन्त्य बाक्यम्-

भद्रपादप्रसादेन श्रवणाभ्यासयोगतः
कुद्दालनाम कुशली तेन संग्रस्थितोह्ययम्
भद्रपादस्य दासोहं अन्यथाचार्ययोगिनां
सत्वानामशेषाणां भवेय जन्मजन्मनि ।
अनेनाशय (यो)च्चारेण यदि बुद्धो भवाम्यहं ।
नोवा नरकयामिनरक एव सुखावती ॥

इति लिखितविषलगुरुक्रमणां त योग (द्योग) वृहदगुणाशेषमन्त्रसद्भावमत च संभूतम् । अचिन्त्याद्वयभागं तु उपपन्नक्रमो यागमात्रो नीत्रिगर्भदेवतारुपं । आत्मनः स्मरणार्थमस्मज्जननऽ (हु) सन्तंवुद्धानाम् । इत्यचित्याद्वयक्रमोपदेश समाप्तम् ॥ कृतिरियं कुद्दालपादानामिति प्रावृतराजम् ॥ भूयात् ॥

फलान्नप्राशनादिविधिः

क्रमाङ्कः च १०३४ विषयाङ्कः ९९

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ७ ।
आकारः ६×३ । ग्रन्थसंख्या १४५ । पत्रसंख्या व्याससफू । पूर्णा ।

बुद्धचरितमहाकाव्यम्

क्रमाङ्कः तृ २९७ विषयाङ्कः १००

ग्रन्थकारः । नेपालीयं कागतम् । देवनागरीलिपिः । पङ्क्तयः १० ।
आकार; १३॥×५ । ग्रन्थसंख्या १९०० । पत्रसंख्या ६६ । पूर्णम् ।

आदिवाक्यम् —

ॐ नमः सर्वज्ञाय ॥
श्रियं पराद्धर्यां विदधद्विधातृजित्तमोनिरस्पन्नभिभूतभानुभृत्
नुदन्निदाघं जितचारुचंद्रमाः स वन्द्यतेर्हन्त्रिहयस्य नोपमा ॥
आसीद्विशालोन्नतसानुलक्ष्म्या पयोदपङ्क्त्येव परीतपार्श्वं ।
उदग्रधिष्णो गंग णोऽवगाढं पुरं महर्षेः कपिलस्य वस्तु ॥
सितोन्नतेनेव नयेन हृत्वा कैलाशशैलस्य यदग्रशोभां ।
भ्रमोदुपेतान्वहदम्वुवाहान् सम्भावनां वा सफलीचकार ॥
रत्नप्रभोद्भासिनि यत्र लेभे तमोनदारिद्रच'मिव ।वकाशं ।
पराद्धर्यंपौरैः सहवासतोषात्कृतस्मितेवातिरराजलक्ष्मी ।:
यद्वेदिकातोरणसिंहकर्णो रत्नैर्दधानां प्रतिवेश्मशोभां ।

जगत्यदृष्टेव समानमत्पर्द्धां स्वगेहैः मथएव चक्रे
रामामुखेन्दुत्वपरिभुतपद्मान् यत्रोपपातोप्यविमान्यभानुः
सन्तापयोगादिव वारिवेष्टुं पश्चात्समुद्राभिमुखः प्रतस्थे ॥
शाक्यार्जितानां यशषां जनेन दृष्ट्वान्तभाव गमितोयमिन्दुः ।
इति ध्वजैश्चारुवलत्पताकै र्यन्माष्टमस्यांकमित्रोदयछत् ॥
कृत्वापि रात्रौ कुमुदप्रहासमिन्दोकरैर्यद्रजतालयस्थैः ।
सौवर्णाहर्म्येषु गताकंपादैः दिवासरोजद्युतिमाललम्वे ॥
महीभृतां मूर्द्धनि कृताभिषेकः शुद्धोदनो नाम नृपोर्कबन्धुः।
अध्याशयो वा स्फूटपुंडरीकं पुराधिराजं तदलञ्चकार ॥

पुष्पिकावाक्यानि -

इति श्रीबुद्धचरिते महाकाव्ये भगवत्प्रसूतिर्नाम प्रथमः सर्गः
" " अन्तःपुरविहारो नाम द्वितीयः सर्गः
" " संवेगोत्पत्तिर्नाम तृतीयः सर्गः
" " स्त्रीविघातनो नाम चतुर्थःसर्गः
" " अभिनिष्क्रमणो नामपञ्चमस्सर्गः
" " छन्दकनिवर्तना नाम षष्ठः सर्गः
" " तपोवनप्रवेशो नामः सप्तमः सर्ग
" " अन्तपुरविलापो नामाष्टमः सर्गः
" " कुमारोन्वेषणो नाम नवमः सर्गः
" " श्रेण्याभिगमनो नाम दशमः सर्गः
" " कामविगर्हणो नाम एकादशः सर्गः
" " अराडदर्शनो नाम द्वादशः सर्गः
" " मारविजयो नाम त्रयोदशः सर्गः

" " अभिसंबोधनसंस्तवनं नाम चतुर्दशः सर्गः

" " धर्मचक्रप्रवर्तनाध्येषणां नाम पञ्चदशः सर्गः

" " धर्मचक्रप्रवर्तनं नाम षोडशः सर्गः

" " लुम्बिनियात्रिकं नाम सप्तदशः सर्गः

अन्त्यवाक्यम्-

शाक्यसिंहस्य जन्मावदानस्य माहात्म्यमेवं मया भूरिगो(शो) वर्णितं स्वल्पशः पंडितैः शोधनीय यदत्रच्युतं वालसंभाषणं नोपहास्याय हर्षाय भो ॥ विश्वरूपाकृतैर्द्धर्मराजस्य संसाररक्षाकृतो वर्णनात्कौशमयं मम, अस्तु तत्पुण्यपुञ्जप्रवृत्यौ निवृतौ जनानां प्रमादाय षद्यानिषुस्थायिनां ॥

समय :— शुभ सम्वत् १०११ मिति वैशाख कृष्ण ३ मंगलवार थ्व कुन्हुया दिनस सम्पूर्ण याङाओं ॥

वुद्धचरितमहाकाव्यम्

क्रमाङ्क तृ १६१ विषयाङ्कः १०१

ग्रन्थकारः आचार्यःअश्वघोषः। ताडपत्राणि । नेवारीलिपिः। पङ्क्तयः ६। आकारः ११३/४×२। ग्रन्थसंख्या १४६०। पत्रसंख्या६४। खण्डितम्।

वुद्धनामाष्टोत्तरशतकम्

क्रमाङ्कप्र १६६७ख२ विषयाङ्कः १०२

ग्रन्थकारः आचार्यव्रह्मः। ताडपत्राणि । मैथिलाक्षरः । पङ्क्तयः ५। आकारः१२ × १३/४। ग्रन्थसंख्या ६५ । पत्रसंख्या २।पूर्णम्।

बुध्दोक्तसंसारामयः

क्रमाङ्कः तृ २९० विषयाङ्कः १०३

ग्रन्थकारः। नेपालीयं कागतम्। देवनागरीलिपिः। पङ्क्तयः ८। आकार; ८३/४×३१/४। ग्रन्थसंख्या ११२। पत्रसंख्या ६। पूर्णः।

--आदिवाक्यम्–

ॐ नमः श्री वज्रसत्वाय
सुमेरुगिरिमुर्द्धनि च बोधिसत्वैर्जगद्दुरुं
काश्यपप्रमुखैर्वुद्धै मैत्र्यादिषोडरोस्तथा ॥
त्रयोदशभिक्षुशतैः श्रावकाद्या(द्यैः) गणैः सहः।
ब्रह्माद्याः देवताः सर्वे सिद्धिविद्याधरादयः ॥
नागाः यक्षाः पिशाचाश्च राक्षसाश्च महोरगाः
ऋषयो लोकपालाश्च शाक्यसिंहपुरस्कृतः।
भगवन्सर्वसत्वेषु स्थितिसंहारकः
सर्वज्ञः सर्वदर्शी च सर्वसत्वैककारकः
कथमुत्पद्यते लोकः कथं यान्ति कथं क्षयाः
संसाराब्धिमहाघोरे उत्तीर्णाश्च कथंययौ
कथं मृत्युः कथ प्रेतः कथं पापानि किल्विषं
कथं धर्मः कथं मुक्तिः कथ कर्म दिवगंत
कस्मात्पिण्डप्रदानञ्च केते पिण्डप्रपातनं
दानधर्मं किमारख्यातः (तं) जपध्यानेन किं पुनः

कथं दुर्गतिःसंशोध्या पिता पुत्रेण मोक्षदं
लिनोत्तरकथ पिण्ड वद मे परमेश्वर

पुष्पिकावाक्यपनि —

इति बुद्धोक्तसंसारामये प्रथमोद्देशः
" द्वितीयोद्देशः
" तृतीयोद्देशः
" चतुर्थोद्देशः
" पञ्चमोद्धेशः
" षष्ठोद्देशः
" सप्तमोद्देशः

अन्त्यवाक्यम् —

बृद्धपितामहश्चैव प्रपितामहपितामहा;
विकेलाद्या (न्) ततः पश्चात् पितृषु चैव दापयेत्।
वर्णगन्धसमायुक्तं खाद्यभोज्यसमन्वितं
पुष्पधूपविधिञ्चैव प्रणाम्य सर्वगोत्रभिः
विप्रादीन् भोजयेदिच्छा नद्यां पिण्डं प्रपातयेत्
नीवर्तयेद्गृहांगानि सर्यादानं यथाविधिः ।
गुरवे दक्षिणां दत्वा वस्त्रादि भरणोत्तमम
आशीर्वादं ततो दद्यात् स गोत्रैः सह भोजनं।
लोकोत्तरकृत पश्चात् भक्त्यादिपिण्डपातये
यथोक्तं गणचक्रादि धूमाःगारी सुशोवयेत्
शेषबल्यार्चणांतेषु दीपादि दाप्यते किल

इति बुद्धोक्तसंसारामये सप्तमोद्देशो द्वादशाधिकैकशतश्लोकं समाप्तम्

बृहद्धारणीसंग्रहः

क्रमाङ्क: तृ ६४१ विषयाङ्क १०४

ग्रन्थकार: अश्वघोषपादाःआचार्याः नेपालीयं कागतम्। नेवारीलिपिः। पङ्क्तयः११। आकार १२½× ६½। ग्रन्थसंख्या १२०००। पत्रसंख्या ३८३। पूर्णः।

बोधिचर्यावतारः

क्रमाङ्क: तृ २५७ विषयाङ्क १०५

ग्रन्थकार: आर्य श्रीशान्तिदेवपाद:। नेपालीयं कागतम्। नेवारीलिपिः। पङ्क्तयः५। आकार: ७ × २½। ग्रन्थसंख्या १०००। पत्रसंख्या १२६। पूर्णः।

आदिवाक्यम् —

सर्वगुरुबुद्धवोधिसत्वेभ्यो नमः ॥
सुगतान्सुतान् सधर्मकायान् प्रणिपत्यादरतोऽखिलाञ्च वद्यान्
सुगतात्मजसम्बरावतारं कथयिष्यामि यथागमं समासात् ॥
नहि किञ्चिदपूर्वमत्र वाच्य न च सद्ग्रन्थनं कौशल ममास्ति।
अतएव न मेऽपराधचिन्ता स्वमनो भावयितुं कृतं मयेद ॥
मम तावदनेन याति बृद्धि कुशलम्भावयितुं प्रसादवेगः।
अथ मत्समधातुरेव पश्येदपरोप्येनततोऽपि सार्थकोयं ॥
क्षणसम्पदियं सुदुर्लभा प्रतिलब्धा पुरुषार्थसाधनी।

यदि नात्र विचिन्त्यते हितं पुनरप्येष: समागमः कुतः ।
रात्रौ यथा मेघघनान्धकारे विद्युत्क्षणां दर्शयति प्रकासं
बुद्धानुभावेन तथा कदाचिल्लोकस्य पुण्येषु मतिः क्षणं स्यात् ।।
तस्माच्छुभन्दुर्वलमेव नित्यं वलन्तु पापस्य महत् सुघोरं
तज्जायतेऽन्येन शुभेन केन सम्वोधिचित्तं यदि नाम न स्यात् ।।
कल्पाननल्पान् प्रविचिन्तयद्भि दृष्टम्मुनीन्द्रै हितमेतदेव ।
यतः सुखेनैव सुखस्य बुद्धमुत्प्लावयत्य प्रमिताज्ञनौघान् ।
भवदुःखशतानि तर्तुं कामैरपि सत्वव्यसतानि हर्तुकामैः ।
वहुसौख्यशतानि भोक्तुकामैर्न विमोच्यं हि सदैव वोधिचित्तं ।।

पुष्पिकावाक्यानि —

इति वोधिचर्यावतारे वोधिचित्तानुशसा प्रथमः परिच्छेद
,, पापदेशना द्वितीयः परिच्छेदः
,, वोधिचित्तपरिग्रहस्तृतीय; परिच्छेद:
,, संप्रजन्यरक्षणा: पञ्चमः परिच्छेदः
,, क्षान्तिपारमिता षष्ठः परिच्छेदः
,, वीर्यपारमिता सप्तमः परिच्छेदः
,, प्रज्ञापारमिता नवमः परिच्छेदः
,, परिणामना परिच्छेदो दशमं

अन्तिमवाक्यम —

दशदिग्व्योमपर्यन्तसर्वसत्वार्थसाधने ।
यथा चरति मञ्जुश्री सैवचर्याभवत्मम ।।
आकाशस्य स्थितिर्यावत् यावच्च जगतः स्थितिः।

तावत्मम स्थितिर्भूयाज्जगद्दुःखालिनिघ्नतः ॥
यत्किञ्चिज्जगतां दुःखं तत्सर्वं मयि पच्यताम् ।
बोधिसत्वशुभैः सर्वैः जगत्सुखितमस्तु च ॥
जगद्दुःखैकभैषज्यं सर्वसम्पत्सुखाकरम् ।
लाभसत्कारसहितं चिरं तिष्ठतु शासनम् ॥
मञ्जुघोषं नमस्यामि यत्प्रसादात्मतिः शुभे ।
कल्याणमित्रं वन्देह्यत्प्रसादाच्च वर्द्धते ॥

समाप्ता चेयं बोधिचर्यावतारपरिकथा । कृतिरियमार्यश्रीशान्तिदेवपादाना मिति अनेन पुण्येन भवन्तु भव्याः सुखस्वभावाः निरुपद्रवाश्च । गच्छन्तु बोधिं सुखवृद्धि हेतुं यथा जिना निर्वृत सन्तु सत्वाः ॥

बोधिचर्यावतारः

क्रमाङ्कः च १०२३ विषयाः १०६

ग्रन्थकारः आर्यश्रीशान्तिदेवपादः । नेपालीय कागनम् । नेवारीलिपिः । पङ्क्तयः ७ आकारः ८×३ । ग्रन्थसंख्या १०९५ । पत्रसंख्या ५५ । आद्यैकपत्रखण्डितः ।

समयः— नेपालवत्सरे वेदः शून्याःनिधि च कार्तिके
शुक्लेपक्षे पूर्णमायाञ्च सम्पूर्णं रविवासरे

सं. ९०४ कार्तिकशुक्ले लिखिताचार्यनन्देन जशोधरवासितसदा एतत्पुण्यानु भावेन १ खावतिमवाप्नुयात्॥

बोधिचर्यावतारः

क्रमाङ्कः प्र ७७२ विषयाङ्क १०७

ग्रन्थकारः आर्यश्रीशान्तिदेवः । ताडपत्राणि । नेवारीलिपिः । पङ्क्तयः ७ । आकारः ९½×२½ । ग्रन्थसंख्या १२० । पत्रसंख्या ७। खण्डितः ।

समय :—

श्रेयोस्तु सम्बत् ५११ अशुनि शुक्लपक्षे सप्तम्यायां शुक्रवासरे व्याख्यानं समाप्तम्।

बोधिचर्यावतारः

क्रमाङ्कः तृ २६७ विषयाङ्कः १०८

ग्रन्थकारः आर्यश्री शान्तिदेवः। नेपालीयं कागतम्। देवनागरीलिपिः। पङ्क्तय ८।
आकारः ११$\frac{3}{4}$×४$\frac{1}{2}$। ग्रन्थसंख्या १०००। पत्रसंख्या ४७। पूर्णः।

बोधिचर्यावतारः

क्रमाङ्कः तृ. २४० विषयाङ्कः १०९

ग्रन्थकारः आर्यश्रीशान्तिदेवः। नेपालीयं कागतम्। देवनागरीलिपिः। पङ्क्तयः १३।
आकारः १८$\frac{1}{2}$×८$\frac{3}{8}$। पत्रसंख्या । ग्रन्थसंख्या १०००। पूर्णः।

बोधिचर्यावतारः

क्रमाङ्कःप्र ७७२ विषयाङ्कः११०

ग्रन्थकारः। आर्यश्री शान्तिदेवः। ताडपत्राणि। नेवारीलिपिः। पङ्क्तयः ६।
आकारः ६$\frac{3}{4}$×२$\frac{1}{2}$। ग्रन्थसंख्या ४२०। पत्रसंख्या २७। मध्यान्तखण्डितः।

बोधिचर्याबतारटीका

क्रमाङ्कः तृ ७२७ विषयाङ्कः १११

ग्रन्थकारः पन्डितः भिक्षु प्रज्ञाकरपादः। नेपालीयं कागतम्। देवनागरीलिपिः।
पङ्क्तयः ६। आकारः १०×५। ग्रन्थसंख्या २५००। पत्रसंख्या ३२५। पूर्णाः।

आदिवाक्यम्–

ॐ नमो लोकनाथाय ॥

यानिर्लेपतया निरुत्तरपदं सर्वप्रपञ्चोभिझता

प्रज्ञापारमितादिसंवृतिपदैराख्यायतेऽनाश्रवा ।

यां सम्यक प्रतिपद्य निर्मलधियो यान्त्युत्तमां निवृतिं

तां नत्वा विधिवत्करोति विवृतिं तस्याः प्रसन्नैः पदैः ॥

यत्राचार्यो गुणनिधिरसौ शान्तिदेवप्रकाशो

वक्तुं शक्तः प्रवचनमहान् बोधिपारं प्रयातः ॥

किं तस्यार्थं जडमतीरहं वक्तुमीशस्तथापि ।

प्रज्ञाभ्यासात्सुकृतमसमं प्रत्ततोऽस्मि प्रवृत्तः ॥

ननाम काचिद्गुण से ··· ··· शर्वा

सनामति समस्ति प्रतिभा गुणोर्जिनात् ।

तथापि सन्मित्रनिषेवणात्फलं

यदेवमेतादृसि वाक प्रसर्पति ॥

अन्त्यवाक्यम् —

प्रज्ञायाः विवृत्तिं विधाय विशदं व्याख्यापदैः संवृत

सम्यक् ज्ञानविपक्षदृष्टिनिविडव्यामोहशान्त्या मया

यत्पुण्यं समुपार्जितं हितफल तेनासु सर्वे जनो

मञ्जुश्रीरिव सद्गुणैकवसतिः प्रज्ञाकरो जायताम

वोधिचर्यावतारे प्रज्ञापारमितापरीच्छेदटिका समाप्ता । कृतिरियं पण्डितभिक्षुप्रज्ञाकरपादानां ।।

टीकेयं परमा सुयन्त्रितपदा शुद्धा मनोल्हादिनी

संसारार्णवपारगा ··· ··· ··· ··· जने 'नोपमा

आशु प्राविकरी जिनस्य पदवी मायल्लिखित्वा मया

प्राप्तं यत्कुशलं सुसंपदि पदं वारे (च)कुजाह्वये ॥
श्रीमच्छङ्करदेवस्य राज्ये विज(य) शालिनः ।
वाधिचर्यावताराख्यटोका...मिदं शुभम् ॥

वोधिचर्यावतारानुशंसावदानम्

क्रमाङ्कः तृ ६६३ विषयाङ्कः ११२

ग्रन्थकारः । नेपालीयं कागतम् । । देवनागरीलिपिः । पङ्क्तयः ८ ।
आकारः १२$\frac{1}{2}$×४$\frac{1}{2}$ । ग्रन्थसंख्या ८८० । पत्रसंख्या ४७ । पूर्णम् ।

वोधिसत्वपिटकम्

क्रमाङ्कः तृ ६४५ विषयाङ्कः ११३

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ७ । आकारः १२$\frac{1}{2}$×४$\frac{3}{4}$
ग्रन्थसंख्या ६०० । पत्रसंख्या ३९ । अपूर्णम् (अन्त्यखण्डितम्)

आदिवाक्यम् —

नमो मञ्जुनाथाय ॥ अथ भगवान् शाक्यमुनिः सर्वनक्षत्रग्रहतारकज्योतिषां सर्वलोकधातुपर्यापन्नं (नान्) सर्वदिग्व्यवस्थितान् सर्वे महर्द्धिकोत्कृष्टतरान् ग्रहानामन्त्रयतेस्म । शृण्वन्तु भवन्तमार्षाः सर्वग्रहनक्षत्रप्रभावस्वाचं प्रभावं च विदर्शयितुं भवन्त सर्वमन्त्रक्रियार्थान् साधितु(साधयन्तु) भवन्तः समये च तिष्ठन्तु भवन्त इह कल्पराजे मञ्जुघोषस्य शासने सिद्धि परतस्थान्यां कल्पराजांसि औत्सुक्यमना भवन्तु भवन्त इति । अथ भगवान् शाक्यमुनिग्रहाणाञ्चरितं सर्वसत्वार्थं वक्ष्ये हितार्थं सर्वजापिनां मन्त्रार्थञ्च प्रसाधितुं वक्ष्ये सर्वं संगितं ।

पुष्पिकावाक्यानि—

आयमञ्जुश्रियमलकल्पावोधिसत्वपिटकावतंसकात्महाया -
नवैपुल्यसूत्रादेकोन्नविङ्गतिमनिमित्तज्ञानज्योतिषपटलविस्तरः परिसमाप्तः
वोधिसत्वपिटकावतंसकात्महायानवैपुल्यसूत्रादार्यमञ्जुश्री -
मूलकल्प दुन्नपञ्चाशपटलः विसलाद्वितीयग्रहनक्षत्रे लक्षणाक्षत्र
नक्षत्रज्योतिषज्ञानपरिवर्तपटलविस्तरः परिसमाप्तः
वोधिसत्वपिटकावतंशकात्महायानवैपुल्यसूत्रादयं मञ्जुश्रीमूल-
कल्पात्पञ्चासतिमः पटलविस्तरः समाप्तः
इति पुष्पिकावाक्यतः ८ पत्रानन्तरं खण्डितम् ।

वोधिसत्वभूमिः

क्रमाङ्क तृ ६८१ विषयाङ्क ११४

ग्रन्थकारः। ताडपत्राणि । रञ्जनालिपिः । पङ्क्तयः ५ ।
आकारः२३ × ¼ । ग्रन्थसंख्या ३४४५ । पत्रसंख्या १०८ । खण्डिता ।

द्वितीयपत्रस्यादिवाक्यम्-

.... पुनरेतद्गोत्रमाधारइत्युच्यते उपस्तम्भो हेतुन्निश्रय उपनिषपूर्वङ्गमो निलय इत्युच्यते । यथागोत्रमेवं प्रथमश्चित्तोत्पादः सर्वा चवोधिसत्वचर्या ॥ तत्र गोत्रं कतमत्, समासतो गोत्र ··· ······ प्रकृतिस्थं समुदानीतञ्च ।। तत्र प्रकृतिस्थं गोत्रं, यद्बोधिसत्वानां षडायतनविशेषः । स तादृशः परम्परागतोऽनाद्रिकालिको धर्मताप्रतिलब्धः । तत्र समुदानीतं गोत्रं । यत्पूर्वकुशलमूलाभ्यासात्प्रतिलब्धः ।। तदस्मिन्नर्थे

द्विविधमप्यभिप्रेतम् । तत्पुनः गोत्रन्वीजा ··· ··· प्रोच्यते धान्तः प्रकृतिरित्यपि । तत्पुनः रसमुदागतफलं सूक्ष्मं विना फलेन । समुदागतफलमौदारिकं सह फलेन । तेन खलु गोत्रेण समन्वागतानां वोधिसत्वानां सर्वश्रावकप्रत्त्येकबुद्धानतिक्रम्य प्रागेवान्यान्सर्वसत्वान्निरुत्तरो विशेषो वेदितव्यस्तत्कम्य हेतो ··· ·· इमे समासतो विशुद्धि क्लेशावरणविशुद्धि ज्ञेयावरणविशुद्धिश्च । तत्र सर्वश्रावकप्रत्येकवुद्धानान्तद्गोत्रं क्लेशावरणविशुद्धया वोधिसत्वगोत्रं पुनरपि क्लेशावरणविशुद्धया अपि ज्ञेयावरणविशुद्धया विशुद्धयति तस्मात्सर्व ··· ··· निष्ठन्निरुत्तरमित्युच्यते ।

पुष्पिकावाक्यानि —

वोधिसत्वभूमौ आधारयोगस्थाने प्रथमं गोत्रपटलं समाप्तम्

" " द्वितीय चितोत्पादपटलं "

" " स्वपरार्थपटलं तृतीयं

" " चतुर्थं तत्वार्थपटलम्

" " पञ्चमं प्रभावपटलम्

" " षष्ठं परिपाकपटलम्

" " सप्तमं वोधिपटलम्

" " नवमं दानपटलम्

" " दशमं शीलपटलम्

" " एकादशं क्षान्तिपटलम्

" " द्वादशं वीर्यपटलम्

" " त्रयोदशं ध्यानपटलम्

" " चतुर्दशं प्रज्ञापटलम्

" " षोडशं पूजासेवाप्रमाणपटलम्

" " चतुर्थं विहारपटलं समाप्तं ।

समाप्तञ्च योगस्थानं द्वितीयम्

बोधिसत्व आधारनिष्ठयोगस्थाने प्रथममुपपत्तिपटलम्

„ „ द्वितीयं प ... हपटलम्

„ „ तृतीयं भूमिपटलम्

„ „ षष्ठं प्रतिष्ठापटलम् समाप्तं

अन्त्यवाक्यम् —

अतो महत्ज्ञानान्तरमात्कभावान्त रच्चित्तान्तरन्तथागतनिष्ठागमनभूमिस्थित बोधिसत्व योर्वेदितव्यम् । एवमभिसंबुद्धबोधिम्तथागतैः दशसु दिक्षु सर्वस्मिन्‌ बुद्धक्षेत्रे सर्वं वुद्धकार्यं करोति, तत्र वुद्धकार्यं कतमत् तत्समासतो दशभानि तथागतस्य तथागतकृत्यानि तथागतकरणीयानि । एकैकञ्च तथागतकृत्यमप्रमाणानां सत्वानामर्थकारक भवति, नास्त्यत उत्तरिनास्त्यतो रूपः कतमानि दशश्च महापुरुषभावे आचितचित्तप्रसाद-कारकं महापुरुषसंप्रयजनना प्रथमं तथागतकृत्यं, तच्च लेखयित्वा वाचयिष्यति पूजासत्कारञ्च प्रयोजतें तस्य समासतो यावान् पुण्यस्कंधो भगवता सर्वबोधिसत्वपिटक-संगृहीतस्य सूत्रान्तस्य श्रावणादिकर्मणा आख्यानं उत्तानो विवृत्तः प्रज्ञप्तः प्रकाशितः । तावानस्य पुण्यस्कन्धः प्रत्याशंसितव्यः । तत्कस्यहेतो नथायहस्यां बोधिसत्वपिटकस्योद्दे-शनिर्देशमुखानि संगृहीन्याख्यातानि यावच्चास्यां भूमौ यो धर्मविनयो विस्तरेण प्रकाशितः स वहुलमुद्देशस्वाध्यायधर्मानुधर्मप्रतिपान्वितः । स्थास्यति पृथुवृध्दि वैपुल्यताञ्च गमिष्यति न तावत्सद्धर्मप्रतिरूपकाः प्रचुरा भविष्यन्ति सद्धर्मान्तर्द्धानाय यतश्च पुनः सद्धर्मप्रतिरूपका प्रचुरा भविष्यन्ति। ततश्चार्यसद्धर्मो भूतार्थोसंहितो यस्य तदन्तर्द्धानं भविष्यति। समाप्ता च बोधिसत्वभूमिः ये धर्मा हेतुप्रभवा हेतुस्तेषां तथागतो ह्यवदत् । तेषाञ्च यो निरोध एवं वादि महाश्रमणः ।

बोधिसत्वजातकावदानमाला

क्रमाङ्कः तृ २५९ विषयाङ्कः ११५

ग्रन्थकारः । नेपालीय कागतम् । देवनागरीलिपिः । पङ्क्तयः ६ । आकारः १६.३ × ३ ग्रन्थसंख्या १२०० ।पत्रसंख्या ३८ मध्यखण्डिता ।

वौद्‌धग्रन्थस्य कारिकारूपव्याख्या

क्रमाङ्कः क १ तृ १६६७१ विषयाङ्कः ११६

ग्रन्थकारः । ताडपत्राणि । प्राचीन नेवारीलिपिः। पङ्क्तयः ७।
आकारः १६×३½। ग्रन्थसंख्या १३१५ । पत्रसंख्या २४ । प्रकीर्णा।

वौद्‌धत्रिंशिकाभाष्यम्

क्रमाङ्कः प्र १६६७ क १ विषयाङ्कः ११७

ग्रन्थकारः । आचार्यवसुबन्धुः । ताडपत्राणि । नेवारीलिपिः। पङ्क्तयः ७।
आकारः १२×२ । ग्रन्थसंख्या ३४५ । पत्रसंख्या १३ । आद्यन्तखण्डितम्ः ।

बौद्‌धदेवतालक्षणशास्त्रम्
ने. भा.

क्रमाङ्कः च. १०३३ विषयाङ्कः ११८

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः। पङ्क्तयः ६ ।
आकारः ८½×३ । ग्रन्थसख्या १६० । पत्रसंख्या व्यासासफू । अन्त्यखण्डितम् ।

वौद्‌धदोषाकोषः

क्रमाङ्कः प्र १६३३ विवयाङ्क ११६

ग्रन्थकारः आचार्यसरहपाद ः। ताडपत्राणि । प्राचीननेवारीलिपिः। पङ्क्तयः७ ।
आकारः ८¼×२। ग्रन्थसंख्या ५० । पत्रसंख्या ५ । प्रकीर्णा पत्रम् ।

समय :— सम्वत् आ थ १ (२) श्रावणशुक्लपूर्णमास्यां श्रोनोग्वलक परमोपासक श्रीराम- वर्म्मणः पुस्तकोयं । यथा दृष्टं तथा शाक्यभिक्षुस्थबिरप्रथमगुप्तेन लिखितव्यम् ॥

बौद्धदोहाकोषटीका
(मेखलानाम्नी, मूलसहिता)

क्रमाङ्कः तृ ७२१ विषयाङ्क १२०

ग्रन्थकारः आचार्यपादः । : नेपालीयं कागतम् । नेवारीलिपिः पङ्क्तयः ५।
आकारः १२½× ३½। ग्रन्थसङ्ख्या १२० । पत्रसंख्या १८ । पूर्णा ।

आदिवाक्यम् —

ॐ नमः श्रीवज्रधराय ॥
लो अहगव्व समूत्वह इह उपरमथे पविन ।
कोलिह मस्त एक जन होइ निरजनलीण ॥

अस्यायमर्थः ॥ लोको गर्व समूत्व इति ॥ कोशौ गर्वाहः परमार्थप्रविशा इति, एतच्च यावत्सभवन्न युज्यते ॥ ततो योगी कोटिनां मध्ये एकोपि यदि भवति निरञ्जनलीन इति ॥ निर्गता (नि) अंजनानि रागद्वेषादिक्लेशा अस्मिनिति निरजन सहजकायः ॥ तत्र लीनो निमग्नमना जो(यो)गीन्द्र स च माटश इति भावः ॥

अन्त्यवाक्यम् —

जिमलोन विनिज्ज दुपाणि एहि तिनि मघरिणि लई चित्त ।
समरस जइ तस्कने जई पुनु तेन मणित्त ।।

अयमर्थः ॥ यथा लवणं विलीयन्ते पाणी(नीं)येन तत्ता गृहिणी इनरू- पिणि गृहीत्वा चित्तं समरसमेकलालीभाव गच्छेत् ।। तत्क्षणं यदि पुनस्तया सुखचित्त

रुगाया गृहीतया समं नित्यं अनवस्थितो भवतीति ॥ एतेन युगनद्धात्मको वज्रसत्वो दर्शित इति ॥३२॥ इत्याचार्यपादाय दोहाकोषमेखलाटीका समाप्तः(प्ता) शुभम् ।

बौद्धधर्मश्लोकसंग्रहः

क्रमाङ्कः प्र १६६७ क १ विषयाङ्कः १२१

ग्रन्थकारः । ताडपत्राणि । नेवारीलिपिः । पङ्क्तयः ६-७ ।
आकारः १२ × ३³ । ग्रन्थसंख्या । पत्रसंख्या । खण्डितः ।

बौद्धधर्मण्डलदेवतानामानि पूजाविधिश्च

क्रमाङ्कः प्र. १६६७ ख २ विषयाङ्कः १२२

ग्रन्थकारः । ताडपत्राणि । भुजवलाक्षरः । पङ्क्तयः ६ । आकारः ११ × १½
ग्रन्थसंख्या २१० । पत्रसंख्या १२ । खण्डिता ।

बौद्धशास्त्रस्य कश्चनग्रन्थः

क्रमाङ्कः प्र १६६७ क १ विषयाङ्कः १२३

ग्रन्थकारः आर्यदेवपादः । ताडपत्राणि । नेवारीलिपिः । पङ्क्तयः ६ ।
आकारः १२×२³⁄₄ । ग्रन्थसंख्या १२०० । पत्रसंख्या ३८ । मध्यखण्डिता ।

आदिवाक्यम् —

महायाने सुविस्पष्टे मुक्तमेतत्सुविस्तरं ॥६॥
धर्मपुद्गलनैरात्म्या चित्तमात्रं जगौ मुनिः ।
ततोऽपि सवमुत्पन्नं गमक सुनिराकुलं ॥७॥

भावग्रहग्रहावेश गृहितान्प्रतिचोदितं ।
आगमेपि हि सुव्यक्तं विस्तरं करुणात्मना ॥८॥
मनःपूर्वाङ्गमाधर्मा श्रेष्ट ...... मनोजवाः ।
मनसा च प्रदुष्टेन भाषते वा करोति वा ॥६॥

अन्त्यवाक्यम् —

यथोदकमणिः सम्यक् कलुषोदकशोधकः ।
सद्धर्मास्तथा प्रोक्ताश्चित्तरत्नविशोधकः ॥१२८॥
शर्धा(श्रद्धा)वान्पूज्यते क्वापि प्रज्ञाचक्षुविर्वर्जितः ।
उत्पादयेदतः प्रज्ञामागमाधिर्गमात्मिकां ॥१२६॥
श्राद्धो वहु श्रुतःप्राज्ञः प्रकृत्या करुणात्मकः ।
जगद्दुःखविनाशाय सुखोपायं स विन्दति ॥१३०॥
चित्तविशुद्धिमाधाय यन्मयोपार्जितं शुभ ।
चित्तविशुद्धिमाधाय तेनास्तु सुखिपाभाजनः ॥१३१॥

कृतिरियमार्यदेवपादानामिति ॥ स्वपरार्थहेतुना पात्रहरिरत्ने(ने)ति शुभं रूपं लिखित ॥

वौद्धशास्त्रीयदीक्षाविधिः

ने. भा. स.

क्रमाङ्कः च ०७८ विषयाङ्कः १२४

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ६ । आकारः १०×३½
ग्रन्थसंख्या ११६० । पत्रसंख्या१०४ । पूर्णा ।

१ वौद्धशास्त्रीयपत्राणि

क्रमाङ्कः प्र १६६७ विषयाङ्कः १२४

ग्रन्थकारः । ताडपत्राणि ।। लिच्छवीलिपिः प्राचीन नेवारीलिपिश्च । पङ्क्तयः ७।
आकारः २०×२। ग्रन्थसंख्या ४४०। पत्रसंख्या ८। प्रकीर्णानि।

२ बौध्द्शास्त्रीयपत्राणि

क्रमाङ्कः तृ. ७३७ विषमाङ्कः २२५

ग्रन्थकारः । ताडपत्राणि । प्राचीननेवारीलिपिः । पङ्क्तयः ६ ।
आकारः २२×२ । ग्रन्थसंख्या ३३० । पत्रसंख्या ८ । प्रकीर्णानि ।

३ वौध्द्शास्त्रीयपत्राणि

क्रमाङ्कः प्र. १६६७ क २ विषयाङ्कः १२६

ग्रन्थकारः । ताडपत्राणि । नेवारीलिपिः । पङ्क्तयः ५-६ । आकारः ११×२।
ग्रन्थसंख्या ३०० । पत्रसंख्या १७ । प्रकीर्णानि ।

---

(१) अत्र संधिनिर्मोचनासेकस्य १ पत्रं, अध्यात्मिकविषयकं १ पत्रं, स्वप्नविषयकं १ पत्रं अन्यपत्राणि च प्रौढग्रन्थानां दृश्यन्ते ।

(२) अत्र वौद्धतान्त्रिकाध्यात्मिकविषयाणां निरूपणानि दृश्यन्ते, मध्ये मध्ये साङ्ख्यसिद्धान्तस्य समुल्लेखं तथैव प्रौढकारिकाश्च वर्तन्ते ।

(३) अत्र महाप्रतिसरावसुन्धरादेवीनां धारणी पूजाविध्यादितन्त्रग्रन्थानां पत्राणि दृश्यन्ते ।

बौद्धसाम्प्रदायिकसपर्या

क्रमाङ्कः प्र. १४९१ विषयाङ्कः १२७

ग्रन्थकारः। नेपालीयं कागतम् / नेवारीलिपिः। पङ्क्तयः ६ ! आकारः ५$\frac{1}{2}$×२$\frac{1}{2}$ ग्रन्थसख्या १२५ ।पत्रसंख्या ठ्यासफू / खण्डिता !

बौद्धाधिकारव्याख्या

क्रमाङ्कः प्र १५०८ विवयाङ्क १२८

ग्रन्थकारः आचार्यनरहरि :। ताडपत्राणि। मैथिलीलिपिः। पङ्क्तयः ६ । आकारः १५ × २$\frac{3}{8}$ । ग्रन्थसंख्या १६८० । पत्रसंख्या ७० । खण्डितान्ता ।

आदिवाक्यम् —

श्रीनरसिंहाय नमः
नमयन्नवनीभुजां शिरोभिर्दलयन्नष्टकुलाचलैः सहैव ।
रभसेन शरासन पुरारेर्भविकं मामकमातनो तु रामः
मूक्तया पितृचरणानामवगत सन्दभसारेण ।
क्रियते श्रीनरहरिणा व्याख्या 'बौद्धाधिकारस्य ॥

समाप्तिकामनया कृतं प्रणाम शिष्यशिक्षार्थं निबघ्नाति स्वाम्यमिति तस्मै जगतामीशथ जगदीश्वराय नमः ॥ इत्यादि ।

भगवत्यायाः स्वेदायाः यथालब्धतन्त्रराजः

क्रमाङ्कः तृ३५९ विषयाङ्कः १२९

ग्रन्थकारः । ताडपत्राणि । प्राचीननेवारीलिपिः । पङ्क्तयः ५ ।

आकारः २१×२। ग्रन्थसंख्या १८०० । पत्रसंख्या ५६ । मध्यखण्डितः ।

आदिवाक्यम् —

ॐ नमश्चण्डवज्रपाणये ॥

अथातो भगवतः विपुलप्रभासं नाम नगरे विहरतिस्म ॥ इहता देवनागयक्षराक्षसासुरगरूडकिन्नरमहो(र)गैः मनुष्यामनुष्यैः महता रिषिभिः महता सत्वनिकायसमागते महाधर्मदेशनाकथामकार्षीत्.। अथ खलु तत्र पर्षद्मध्ये विजयप्रभासो नाम श्रेष्ठी धनकनकसमृद्धया(ता)वद्धैः श्रावणप्रतिस्पर्द्ध स्विदेहीसङ्गतः महानुपासकः श्राद्धः कल्याणाश्रय स च राजचण्डप्रद्योतेनोपद्रुत वधकेभ्य(रा) ज्ञप्तः सभीतस्तत्र भगवतः स्वाकायमुपागतः । अथः विजयप्रभासः श्रेष्ठी उपासकः उत्थायसनाद्भगवतः पुरतः करुणाकरूणां परिदेवमाणः प्ररुदतेवमाह ॥ भगवन्मम राजरोषाभिभूतः वधकेभ्य आज्ञाप्त तेनाहं जीवितहेतो रतीव भयामि । कथं मया भगवन् कर्तव्यं कथं प्रतिपत्तव्यं । भगवन् मम त्राणो भदस्व परायणां ॥ अथ खलु शाक्यमुनिर्भगवान् विजयप्रभासं समाश्वास्य महारश्मयः उत्कीर्णाकोसात् विनिर्गताः त्रिप्रदक्षिणीकृत्य भगवतो मुखद्वारे प्रविष्टः समनन्तरं प्रविष्टाश्च भगवतः ललाटादुदक यथामुक्तपलं स्रवितुमारब्ध भगवान्दक्षिणं पाणि प्रसार्य ललाटान् परिमार्ज(यन्) धरणितलं ताडयन् समनन्तरं ताडितम् ।

पुष्पिकावाक्यानि —

विद्युज्जालाकरालो स्वेदाम्बुजमहाराक्षसीसूत्रान्तः समाप्तः
भावनापटलः द्वितीय;

महामण्डलपटल: तृतीय:

समयपटल चतुर्थम्

मन्त्रपटलः पञ्चमः

मुद्रापटल. षष्टमः

आर्यस्वेदाम्वुज भट्टारिकाया: साधनपटलः समाप्तमिति

भगवत्या: विद्युज्जालाकराली आर्यस्वेदाम्वुजमहाराक्षसी प्रथममण्डलः समाप्तः

त्रयकुलामान्यदुदनेत्री शाक्यमुनिचतुर्महाक्षपनिद्योतमेमहामन्त्र विद्युज्जालाकरालीस्वेदाम्वुजमहाराक्षसी चतुर्थं आज्ञापटल: परिसमाप्त:

सान्तिकचक्र: समाप्त:

पौष्टिकभावनाचक्र परिसमाप्तः।

उत्तमपिंडकविद्योतममहामन्त्रे वज्राङ्कुशसाधनविधि परिसमाप्ता

भगवत्याभिचारचक्र अदृश्यशिरच्छेदवज्रपरशुसाधन परिसमाप्तः।

महानीलायां ...... समाप्त;।

अमृतभैषज्यधारणी समाप्ता

मुद्रापटल; समाप्तः

विद्युज्जालाकरालीस्देदाम्वुजमहाराक्षसीमन्त्रपटल समाप्त:

विद्युज्ज्वालाकरालीस्वेदाम्वुजमहाराक्षस्या मुद्रापटल:समाप्तः

अयं विद्युज्जालाकराली स्वेदाम्बुजमहाराक्षसी उत्तरककर्ममन्त्रमुद्रासहित परिसमाप्त:

विद्युत्नामयक्षिणिकल्प: समाप्त;

विद्युज्जालाकरालीस्वेदाम्बुज महाराक्षसस्य प्रेटोत्कटमहामण्डल: द्वितीययक्षिण्या: कल्प: समाप्त:

स्वेतरौद्रीयक्षिण्या कल्पः समाप्तः

अन्त्यवाक्यम् —

यदि नाकर्षयति मूलमुद्रावद्धहस्ततलं स्पशयेत्। तत्क्षणादागच्छति तमाकर्षितो भवति। गृह्येन यक्षिणीकर्म कर्तव्य:। यदि प्रकाशयति यक्षिणी परामुखा यास्यते

मन्त्रधरः। विद्युज्वालाकरालो स्वेदाम्वुजमहाराच (स) स्य प्रेतोत्कटमहामण्डलचतुर्थ द्विशया: कल्प: समाप्तः

यथालब्धतन्त्रराजः समाप्त

समय;— सम्वत् अष्ट ४ श्रावणशुक्लद्वितीयायायां महाराजाधिराजपरमेश्वरश्रीलखिमि (लक्ष्मि) कामदेवपरमेश्वरस्य विजयराज्ये ।। श्रोगांकुटलांगाधिवाषिण कुरणाकरदत्तस्य पुस्तकोयं लिखितमिति । ग्रन्थप्रमाणमस्याष्टशताधिकः सहस्रमेकं ।।

भद्रकल्पावदानम्

(व्रतावदानमालाया अहोरात्रव्रतानुशंसासहितम्)

क्रमाङ्कः च १० विषयाङ्कः १३०

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ७ ।
आकार: १७×५ । ग्रन्थसंख्या १०००० । पत्रसंख्या ४७० । पूर्णम् ।

आदिवाक्यम् —

ॐ नमो रत्नत्रयाय ।।
नत्वा श्रीमत्त्रिरत्न त्रिभवहितकरं सर्वलोकैकवन्धं
जित्वा क्लेशान्समारानमरपददद मोक्षसौख्यैकमार्गम् ।।
वक्षे श्रीशाक्यराजस्वपुरगतकथां सुन्दरं(रां) मोक्षहेतुं
चातुर्वर्गाभिकाङ्क्षा श्रृणुत वुधजना भद्रकल्पावदानम् ।।

जयश्री पुतरुत्थाय समाधेः वोधिमण्डपे । व्याख्यातुं श्रोघनी धर्म्या विजहार संसाधिकः ।। चातुर्वर्णा स्तदाश्रोतुं वोधिमण्डप आगताः । नत्वा गुरुं समभ्यर्च्य क्रमा त्तत्र समश्रिताः ।। तदा जिनश्रीः शिष्याणां नायकस्तत्पुरस्थितः । उद्वमन्नुत्तरासंगं कृताञ्जलिस्तमन्नवीत् ।। श्रुतं ललितव्यूहं गुरोः श्रीमत्प्रसादतः । शुशुषुरथ शाक्येन्द्र प्रत्याग-

मनसत्कथां ।। श्रु श्रूषवइमे सत्याकथामृतपिपासवः। आगता भिक्षुशार्दूल पापुयस्व क-थामृतं ।। इति विज्ञापितस्तेन जयश्रीरादिसम्मुदा । श्रु यतां कथ्यते शिष्या गुरूपदेशतः कथाम ।

पुष्पिकावाक्यानि —

इति श्रीभद्रकल्पावदाने अशोकोपगुप्तसंवादे ब्रह्मादिस्तुतिकृतस्वपुर – प्रत्यागमप्रस्थानं नाम प्रथमो ध्याय:

" " यशोधरागर्भसं धारणोनाम द्वितीयोध्याय·

" " देवदत्तकामलाभोन्मतभूतों नाम तृतीयोध्याय:

;, , गोपाप्रत्यागमनो नाम पञ्चमो ऽध्याय :

" " गोपातीर्थप्रवर्तनो नाम चतुर्थोऽध्याय:

" " गोपाग्निपातनं नाम षष्ठोऽध्याय:

" " गोपाभृगुपतनं नाम सप्तमोऽध्याय:

" " यशोधराया गुर्विन्या: यशःप्रकाशन नामाष्टमोध्याय:

" " यशोधरायाः पुत्रजननं नाम नवमोध्याय!

" " स्त्रिशङ्काष्टिकप्रवज्याचरणपरिवर्तो नाम दशमाध्याय:

" " त्रिंशद्यायजुकप्रवज्याचरण नाम, एकादशोध्याय:

" " मैत्रायणीपुत्र प्रवज्याचरणपरिवर्तो नाम द्वादशोध्याय:

" " नालकमुनिचर्यावृतचरणपरिवर्तोनाम त्रयोदशोध्याय:

" " सभिकसौगतशासनप्रवज्यावृतचारणपरिवर्तोनाम चतुर्दशोध्याय:

" " यशोदावदानं पञ्चदशोऽध्याय:

" " दिवोदासप्रवोधनकर्षकवृतुचारणोनाम षोडशोध्याय:

" ;, गांगेयनाविकवृतचारणो नाम सप्तदशाध्याय:

इतिश्री भद्रकल्पावदानेऽशोकगुप्तसंवादे

तमोध्यायः

" " मातृपोषहस्तिजातकपरिवर्तो नाम त्रयःत्रिशतितमोध्यायः

" " एकश्रृङ्गमुनिनलिनीकाश्यकन्याजातपरिवर्तश्चतुर्विंशतितमोध्यायः

" " सुन्दरनन्दादिपञ्चशतशाक्यकुमारप्रवज्याव्रतसंचारःणो नाम पञ्चशतितमोधयायः

" " सकलानन्दजन्मराहुलभद्रप्रव्रज्याचरणो नाम षट्त्रिंशतितमोध्यायः

" " संवुद्धधर्मानुपरिवर्तो नाम सप्तत्रिशतितमोध्यायः

" " शुद्धोदनतपोवनाभिगमन परिवर्तो नामाष्टत्रिंशतितमोध्यायः

टिप्पिकावाक्यानि —

अथाष्टमीपुष्पभ सूर्यवारे योगे च वृद्धो सभिक्षुसंघैः ।
विनिर्ययौ राजकुलात्मुनीन्द्रः संभासयन्स्वप्रभया समन्ततः ॥
प्राचार्यमान. सकलैः पूरस्थैः निर्वायमानो निहिताञ्जलिभिः ।
पुनः प्रयास्यामि सुभाषितार्थं भज त्रिरत्न समुदीरयन्निति ॥
परस्पर हैत्य समाचारन्तस्तच्चैत्यसेवा सुरतासुभक्त्या ।
दानव्रताः शीलविशुद्धिदेहा ध्यानाक्षमावीयसुवुद्धिवन्तः ॥
शालीसुत दक्षिणतश्च पृष्ठे आनन्दमाधा धृतमुद्गलं च ।
वामे तथा भिक्षु गणाभिकीर्णा विनिर्ययौ कापिलदेशतो जिनः ॥
श्रीमत्स्वयंभूजिनदर्शनार्थं नेपालगामी प्रययौ मुनीशः ।
श्रीशाक्यसिंहेति सदा जपन्स तस्थौ महीपः सकलादिहर्षः ॥
इत्येव मुक्त्वा जिनराजकल्पो ध्यानाश्रितोऽभूदुपगुप्तभिक्षुः

लब्धास्तथाष्टादशभिक्षुकानां ध्यानेषु लीना परितस्थुरेवं ॥
ततस्तथाशोक महीमहीन्द्रः सामात्यलोकः पुरमाविवेश ।
नत्वा च तान् भिक्षुगणान्समर्च्य भूयोभिलाषी श्रवणे सुभाष्ये॥

समय :— नेपाले संवदाख्ये कुनवनवयुते श्रावणे शुक्लपक्षे
पञ्चम्यां वैश्वदेवे परिघकसहिते भानुपुत्रस्य वारे।
वृन्दादे मूलकान्त्ये खलु सुविहरणे श्रीगुरो भक्तियुक्तः
पूर्णानन्देति नामा समलिखदमलं भद्रकल्पावदानम् ॥

भद्रकल्पावदानम्

क्रमाङ्कः तृ. २३३   विषयाङ्कः १३१

ग्रन्थकारः । नेपालीयं कागतम् । देवनागरीलिपिः । पङ्क्तयः १३ ।
आकारः १८३/४×८ । ग्रन्थसंख्या ८२८० । पत्रसंख्या २०८ । पूर्णम् ।

समय :— ईति सम्बत् १९५१ श्रीशाके १८१६ श्री नेपाली सम्वत् १०१४ मिति
कार्त्तिक शुदि ५ रोज सिद्धं भवतु सर्वदा।

भद्रचरीगाथा

क्रमाङ्कः तृ. ७२७   विषयाङ्कः १३२

ग्रन्थकारः । ताडपत्राणि । भुजवलाक्षरः । पङ्क्तयः ४ । आकारः ११३/४×१२ ।
ग्रन्थसंख्या २५ । पत्रसंख्या ३ । प्रकीर्णपत्राणि ।

भद्रचरीमहाप्रणिधानरत्नराजः

क्रमाङ्कः च. १०३१   विषयाङ्कः १३३

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ६ । आकारः ११×३
ग्रन्थसंख्या ६४ । पत्रसख्या ५ । पूर्णः ।

भूतडामरसमाधिः

क्रमाङ्क. तृ. २७० विषयाङ्कः १३४

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ८ ।
आकारः १०×४ । ग्रन्थसंख्या ८० । पत्रसंख्या ७ । पूर्णा ।

मञ्जुवराख्यपूजापद्धतिः

क्रमाङ्कः प्र ७६ विषयाङ्कः १३५

ग्रन्थकारः पूर्णानन्दगिरिः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः १३ ।
आकारः १३½×४। ग्रन्थसंख्या २५० । पत्रसंख्या ५ । पूर्णा ।

आदिवाक्यम् —

ॐ नमो मञ्जुघोषाय ॥
नत्वा मञ्जुवरं समस्तजगतामेकाधिपं वालकं।
लोकानां वरवाक्यदानकुशलं सभक्तमोक्षप्रदं ॥
पूर्णानन्दगिरिः विशुद्धहृदयः तन्त्रोक्तसिद्धिप्रद ।
श्रीमन्मञ्जुवराख्यपूजनविधिं वक्षेत्र शुद्धक्रमं ॥
भैरवीतन्त्रे — मेरुपृष्ठे सुखासीनं देवदेवञ्जगदगुरुं ।
शंकरं परिपप्रच्छ पार्वती परमेश्वरं ॥
श्रीपार्वत्युवाच– भगवन् धर्बधर्मज्ञः सर्वशास्त्रागमादिषु ।
वाञ्छितार्थप्रदं लोके मञ्जुघोषं ब्रवीहि मे ॥

अन्त्यवाक्यम् —

भवगुरुरतिवज्रै रुग्रसद्धर्मसंस्थैः

सुगतगणपुरस्ताद्योभिषिक्ता विधानात् ।
सुमतिरजितमित्र स्तेन स ग्रन्थितं हि
सदवपठनमन्त्र जन्मिनां बुद्धिसिद्ध्यै ॥१४॥
स ग्रन्थ्य चक्रं सुविधानमग्र्यं पुण्यम्मयाप्तं निखिलं समन्तात्
यत्नेन लोको निखिलांघ्रिघातः समञ्जुघोषोऽस्तुमुखैः कणिष्ठः
इति वौद्धसिद्धं सदवपठनसाधनं समाप्तं ॥सिद्धिरस्तु॥

मञ्जुश्रियाख्यवज्रभैरव —
योगतन्त्रम्

क्रमाङ्कः च १९   विषयाङ्कः १३६

ग्रन्थकारः । ताडपत्राणि । नेवारीलिपिः । पङ्क्तयः ७ ।

आकारः ९$\frac{6}{10}$ × १$\frac{?}{?}$ । ग्रन्थसंख्या २०० । पत्रसंख्या ११ । मध्यखण्डितम्

आदिवाक्यम् —

ॐ नमो भगवते मञ्जुश्रियाख्यश्रीवज्रभैरवाय ।
अथातः संप्रवक्ष्यामि वज्रभैरवसाधनम् ।
सर्वेषामेव देवानां अत्युग्रहभयानकम् ॥

तत्रादौ क्वचितमनोनुकूले स्थाने स्थित्वा सर्वकर्माणि साधयेत् । तत्र स्थानानि कथ्यन्ते । श्मशाने नदी (नद्यां) तंत्र वा एकवृक्ष एकलिंगे वा चतुष्पथे पर्वते शिखरे शुन्यायतने मातृगृहे वा देवायतने संग्रामभूमौ नगरावस्यग्रामादिस्थानेषु स्थित्वा मन्त्री अस्मिन्महावज्रभैरवमन्त्रे अभिषिक्तो योगी वस्याकर्षण मारणोच्चाटनविद्वेषणस्तंभणखङ्गञ्जन पातालगुटिकारसरसायनानि निधानभूतवेतालपिशाचयक्षयक्षिणीनागादीश्च साधयेत् अनेन विधिना । तत्रायं विधिः।

पुष्पिकावाक्यानि —

इति मञ्जुश्रियाख्ये श्रीवज्रमहाभैरवयोगतन्त्रे मण्डलनिर्देशः प्रथमकल्पः
" " सवकर्मसिद्धि द्वितीयःकल्पः
" " मन्त्रोद्वारणाकल्प स्तृतीय
" " पटविधानकल्पःपञ्चमः
" " ध्यानकर्मसिद्धिपरिच्चाकल्पःसप्तमः

अन्त्यवाक्यम् —

श्री ओडियानयोयिनीपीठात् श्रीमहावज्रभैरवचक्रलक्षणां तन्त्रोधृत कल्पैकदेश पठितसिद्धि श्रीश्रीवज्रमहाभैरवमहिषमुखस्य सिद्धिसाधनकल्पः समाप्तः। अनेन पुण्येन जगच्छ्रीमहावज्रभैरवसमं भवन्तु ॐ ह्री ष्ट्री विकृतानन हूंफट् ॥ ॐ यमान्तक हूंफट येधर्मा इत्यादि .... शुभ।

मङ्गलमहायानसूत्रम्

क्रमाङ्कः च. ७८२ विषयाङ्कः १३७

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ५ ।
आकारः ५½ × २¾ । ग्रन्थसंख्या २० । पत्रसंख्या ३ । पूर्णम् ।

मञ्जुश्रीज्ञानतन्त्रम्

क्रमाङ्कः तृ. ३०३ विषयाङ्कः १३८

ग्रन्थकारः भञ्जुघोषः । नेपालीय कागतम् । नेवारीलिपिः । पङ्क्तयः ७ ।
आकारः ११½ × ३ । ग्रन्थसंख्या ८०० । पत्रसंख्या ४४ । पूर्णम् ।

आदिवाक्यम् —

नम' सर्ववुद्धवोधिसत्वेभ्यः ।एवं मया श्रुतमेकस्मिन्समये भगवान् शुद्धावासो(सः) परिगगनतर (ल) प्रतिष्ठिते, अचित्याश्चर्याद्भुतप्रविभक्तवोधिसत्व सन्निपातमगडलमध्ये विहरतिष्म । तत्र भगवान् शुद्धावासः कायिकान् देवपुत्रानामन्त्र-यतेस्म । श्रृणवन्तु भवन्तो देवपुत्रा मञ्जुश्रियः कुमारभूतस्य वोधिसत्वस्य महासत्वस्य अचिन्त्याद्भुतप्रातिहार्यश्चर्यासमाधिरिद्धिविशेषं विमोक्षमगडल बोधिसत्वविकुर्व(र्वा)णं सर्वसत्वोपजोव्यमायुमारोग्यैश्वर्यमनोरथपरिपूरकानि मन्त्रपदानि सर्वसत्वानां हिताय भाषिष्ये । तं श्रृणु च साधू च सुष्ठू च मनसि कुरु भाषिष्येहं ॥

पुष्पिकावाक्यानि —

एवमुक्ता न्तु सा सर्वावती पर्षत्तुष्णीमभूत् महायानमन्त्रचर्यानिर्देशा-त्महाकल्पात्मंजुश्रियः कुमारभूतवोधिसत्वविकुर्वाणपटल विसरत मूलकल्पात्प्रथमसन्निपा तपरिवर्त॥

अन्तिमवाक्यम् —

एतत्मगडलविधानं कथितं त्विह समासतः । सत्त्वानां हितकाम्यर्थं मञ्जुघोषेण धीमता ।। ततो मगडलाचार्येण शिष्याः पूर्वमेव तु गृहितव्या अविकलेन्द्रिया सर्वाङ्गशोभनं भवति ॥ वाक्सिद्धि, धनसिद्धि, मन्त्रसिद्धि, पुत्रसिद्धि, ज्ञानसिद्धि, सर्वदेवेनरक्षासिद्धि । इति मंजुश्रीज्ञानतन्त्र समाप्तम् ॥ शुभ ॥

मञ्जुश्रीपाराजिका

क्रमाङ्कः तृ. ५६२ विषयाङ्कः १३६

ग्रन्थकारः । नेपालीयं कागतम् । देवनागरीलिपिः । पङ्क्तयः ११ ।
आकारः १२$\frac{1}{4}$× ६$\frac{3}{4}$ । ग्रन्थसंख्या ३०० । पत्रसंख्या १४ । पूर्णा ।

आदिवाक्यम् —

ॐ नमो रत्नत्रयाय ।।
वुद्धं धर्मञ्च संघंञ्च त्रिरत्नाग्रमनुत्तरम् ।
प्रणाम्य सहसोवाच मञ्जुश्रीकरुणाकरः ।।
संसाराब्धिमहाघोरे निमग्ना.सर्वजन्तवः ।
तारयिष्यति(तरिष्यन्ति.मा(कथं)न्नाथ देशयस्व कथं(महा)मुने
आजीवादं कुलं (यावीजादङकुरं)यावत् पर्यन्तं वोधिमण्डपं ।
नियमादि शुचि शान्ति कथ पाराजिका भवेत् ।।
श्री भगवानाह– सांप्रतं श्रृणु मञ्जुश्री सत्वार्थैकमहारतः ।।

अन्त्यवाक्यम् —

नन्दाभद्राजयासौम्याकपिलाभ्य नमो नमः ।
प्रसीदतु महालक्ष्मी आयुरारोग्यसंपदम ।।
अनया गाथया युक्तं गोभ्योऽन्नं प्राशयेत्पुनः ।।
पत्रमेकं च गोमूत्रं तदर्द्धं गोमयं तथा।।
क्षीरं सप्तपलं ग्राह्यं दधि पञ्चपलानि च ।
घृतमेकपलं ग्राह्यं तीर्थोदकं तथैव च ।।
अनेन साधितं गव्यमिन्द्रस्यापि दुरोपमं ।
मन्त्रतेजोमयं गव्यं सर्वपापविनाशनं ।।
गर्भप्रवेशमात्रेण पोपं गच्छति नाशनं ।।
वर्णानुरुपभेदेन पञ्चगव्यं प्रदापयेत् ।।

इति सर्वतथागतद्वादशसाहस्रपाराजिकाविनयोद्धृत श्रीमुनीन्द्रमुखकमलविनिर्गतपाप–परिमोचनो नाम निर्देशः समाप्तः ।।

समय :— इति सम्वत् १९५४ साल मिति श्रावण शुदि ४ रोज २ तद्दिने श्रीमञ्जु-श्रीपाराजिका संपूर्णा शुभम् ॥

मञ्जुश्रीपाराजिका

क्रमाङ्कः तृ. ९७ विषयाङ्कः १४०

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः १० । आकारः ८¾×४ ग्रन्थसंख्या २७५ । पत्रसंख्या १२ । अन्त्यैकपत्रखण्डिता ।

मञ्जुश्रीपाराजिका

क्रमाङ्कः तृ. २९० विषयाङ्कः १४१

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ७ ।
आकारः १२½×४ । ग्रन्थसंख्या ४०० । पत्रसंख्या २२ । पूर्णा ।
समयः—९९४ ने० स०

मञ्जुश्रीपाराजिका

क्रमाङ्कः तृ ७२१ विषयाङ्कः १४२

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ७ ।
आकारः १२½×४ । ग्रन्थसंख्या ३०० । पत्रसंख्या २३ । पूर्णा ।

समय :— श्रीमन्नेपालसम्वत् चतुरनवनव(९९४) मासकृष्णो च आश्विन् । तत्कृष्णा षष्ठि-तिथ्यां परिदिक्षशितभं सिद्धियोगश्च घस्रो । तत्घस्रोवारशुक्रे रविविसतुला राशिमिथुने च चन्द्रे । तत्दिवसे लेख्यपूर्ण परिभवति शुद्धाशुद्धा जानाति लेख्यं ।

मञ्जुश्रीप्रतिज्ञाधारणी,अभयङ्करीधारणी च

क्रमाङ्कः च. ७८२ विषयाङ्कः १४३

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ५ ।
आकारः ६×२$\frac{3}{4}$ । ग्रन्थसंख्या १५ । पत्रसख्या २ । पूर्णा ।

मञ्जुश्रीबुद्धपादुका

क्रमाङ्कः तृ. ६६९ विषयाङ्कः १४४

ग्रन्थकारः । नेपालीय कागतम । देवनागरीलिपि. । पङ्क्तयः ९ ।
आकारः १२×४$\frac{1}{2}$ । ग्रन्थसंख्या १०० । पत्रसंख्या ५ । पूर्णा ।

आदिवाक्यम् —

ॐ नमो बुद्धाय ॥ श्रीमन्नेपालमण्डले श्रीगोपुच्छपर्वतदक्षदेशे श्रीमञ्जुश्री नाम्निपर्वते प्राकारावृते विहारे विहारिणां मञ्जुश्रीबुद्धधर्मसंघपादुकानां ध्यानमूर्तिकारणानि लिख्यन्ते ॥ तत्र प्रथमं मंजुश्रीपादुकाद्वयध्यान । चतुरस्रवेदिका, पद्माङ्किता-तदन्तः, अष्टदल कमलं ॥ तन्मध्ये पादुकाद्वयं नेत्राङ्कित(म्)। तस्य पादुकाद्वयस्य नाम मञ्जुश्रीपादुका इति कथ्यते ।

अन्त्यवाक्यम् —

मञ्जुश्री योप्येकस्य वहूनि ध्यानानि नामानि कारणवशात् भेदो जातः ॥ ततो वहूनां मंजुश्रीणां मध्ये, एको धर्मचक्रमंजुश्री ॥ अथ वाभिसत्त्वत्वात् बुद्धधर्म संघ(इति) नामधेयं स्थापितम् । स्वमत्यनुसारेण ग्रन्थप्रमाणतश्च ॥ अथ च एकोपि मञ्जुश्री वहुरूप, स न, स्वयमेव कार्यकारणवशात् नामरूपभेदं कृतवान् । कस्मिंश्चि-द्ग्रन्थे मञ्जुश्री स्वयंभू ॥ इति श्रीमञ्जुश्रीबुद्धपादुका परिसमाप्ता । शुभम् ।

मञ्जुश्रीसाधने प्रतिमालक्षणं लक्षणसमुच्चयश्च

क्रमाङ्कः प्र. १३६३ विषयाङ्कः १४५

ग्रन्थकारः । ताडपत्राणि । भुजवलाक्षरः । पङ्क्तयः ६ ।
आकारः १०×१ । ग्रन्थसंख्या १२६ । पत्रसंख्या ६ । मध्यखण्डितम्

समयः— श्रीमन्नेपालसवत्सरे नेपालाव्दगते लोक युग ...... द्ध तथा ॥ मासे वृद्ध श्रवाशुक्ल एकादस्यः कुजा दिने ॥ लिखितं श्रीषडक्षरीमहाविहारे निवासित भिक्षुश्रीधर्मरक्षितेन स्वार्थहेतोः । शुभमस्तु सर्वकालं ।

मणिचूडावदानम्

क्रमाङ्कः तृ. २४५ विषयाङ्कः १४६

ग्रन्थकारः । नेपालीयं कागतम् । देवनागरीलिपिः । पङ्क्तयः १० ।
आकारः १२$\frac{3}{8}$×६$\frac{3}{4}$ । ग्रन्थसंख्या ११०० । पत्रसंख्या ४७ । पूर्णम् ।

आदिवाक्यम् —

ॐ नमः सर्वज्ञाय ॥
भगवानुवाच — अष्टानां वीतरागानां कथां चापि समासतः ।
वक्ष्यामि श्रृणु मैत्रेय कथामतिमनोहराम् ॥
स्वयम्भोः दर्शनार्थाय वोधिसत्वा जितेन्द्रियाः ।
आगता भिक्षवश्चापि तथा योगेश्वरादयः ॥
तेषां मध्ये प्रसिद्धास्तु वीतरागा इमेष्टकाः ।
मणिलिङ्गेश्वरो नाम मणिचूडगिरौ स्थितः ॥ इत्यादि

अन्तिमवाक्यम् —

एवं हि शालिपुत्र: सकान्तिमभ्यो महिषिणा ।
सोमावाशिव्रतं धृत्वा सुपुत्रं श्रीप्रलब्धवान् ॥
येन येन व्रतं धृत्वा पुत्र प्रार्थयति सुधी ।
तेन तस्मिन् सुपुत्रं च सुखभोग्यमवाप्नुयात् ॥

इत्यदं वोधिभिक्षव शिक्षितव्यमिदमवोचद्भगवानात्तमनसः ते च भिक्षवो भगवतो भाषितमभ्यनन्दन्निति । इति मणिचूडावदानं समाप्तम् ॥ शुभम ॥

मणिचूडावदानम्
(ने. भा.)

क्रमाङ्कः च. ३४८ विषयाङ्कः १४७

ग्रन्थकारः । नेपालीयं कागतम । देवनागरीलिपि. । पङ्क्तयः ११ ।
आकारः १२×६½ । ग्रन्थसंख्या २०८० । पत्रसंख्या १०७ । पूर्णम् ।

मणिशैलावदानम्

क्रमाङ्कः च. १२९ विषयाङ्कः १४८

ग्रन्थकारः । नेपालीयं कागतम् । देवनागरीलिपिः । पङ्क्तय. ११ । आकारः १२×६
ग्रन्थसंख्या १६०० । पत्रसख्या ६५ । पूर्णम् ।

आदिवाक्यम् —

श्रीगुरुवुद्धधर्मसंघेभ्यः नम., श्री वज्रयोगिन्यै नमः ॥

उग्रतारां सदा नत्वा भवसागरतारिणीं ।
पद्मगीर्योः कथां वच्मे सर्वसत्त्वानुकम्पया ॥१॥

पुराऽऽसीत्पाटलीपुत्रे नगरे स्वर्गसन्निभे ।
अशोकः नृपराजेन्द्रो बभूव धर्मचारिणः ॥२॥

कुक्कुटाराममयासीनमुपगुप्तयतिं मुनिं ।
नत्वा पादौ समभ्यर्च्यो कृताञ्जलिपुटोवदत् ॥३॥

भदन्त श्रोतुमिच्छामि प्रज्ञापारमिताकथां ।
आदिशक्ति कथं भूता उग्रतारा कथं भवेत् ॥४॥

तारा इति कथं नाम वज्रदेवी कथं विभो ।
तत्सर्वं श्रोतुमिच्छामि विस्तरेण वद प्रभो ॥५॥

इति तेन महीन्द्रेण प्रार्थितोसौ यतीश्वरः ।
उपगुप्तः समामन्त्र्य तं नृपेशं समब्रवीत् ॥६॥

साधु साधु महाराजन् शृणु धर्मं समाहितः ।
यथा मे गुरुणाख्यातं तथा भाषे हिते तव ॥७॥

पुष्पिकावाक्यानि —

इति श्रीमणिशैलमहात्म्ये उग्रतारिण्याः ज्योतिरूपदर्शनकथा प्रथमपरिच्छेदः
,, उग्रतारास्वमूर्तिधारिणावाचासिवरप्रदानो नाम द्वितीयः परिच्छेदः
,, धारिणीप्रदानोवाचासिद्धिजीवन्मुक्तस्तृतीय ,,
,, पूजाफलपुष्पप्रदानकथा चतुर्थपरिच्छेदः
,, तीर्थावदानकथा पञ्चमः परिच्छेदः
,, अगस्त्येन द्वादशतीर्थे स्नानकृतावदानकथा षष्ठः,,
,, कुटिलावदानं सप्तमपरिच्छेदः

इति श्रीमणिशैलमहात्म्ये कुण्डयात्राकृतस्वप्नवरप्रदानो नामाष्टम:परिछेद:

" मणिचूडाजन्मब्रह्मदत्तत्रिपुरुषौकैवल्यप्राप्तो नाम नवम: परिच्छेद:

" पद्मावतीविवाहदानप्रशंसान:मदशम: परिच्छेद:

" निरगन्धयज्ञसंपूर्णस्वमांसप्रदानोनाम एकादश: परिच्छेद:

" मणिचूडे पद्ममाल्ये मणिचूडराज्ञा वानप्रष्ठयोग-कृत द्वादश: परिच्छेद:

" मणिचूडराज्ञा मणिदानकृतराज्ञा भिषेकप्रद-स्त्रयोदश: परिच्छेद.

" देव्या: यन्त्रमहात्म्यवर्णनं चतुर्दश: परिच्छेद:

" अवीचिमुक्तभिक्षोरवदानं पञ्चदश: परिच्छेद:

" यन्त्रो महात्म्यं षष्ठदश: परिच्छेद:

अन्त्यवाक्यम् —

यथा मे गुरुणाख्यातं तथा ते भाषितं मया ।
एतच्छ्रुत्वा महाराजन् दृढचित्तेन सर्वदा ॥
त्वयापि कवचं कृत्वा यन्त्रधार सदा कुरु ।
तथा ते मङ्गलं भूयात् प्रजाश्चापि सुखी भवेत् ।
इति श्रुत्वा अशोकोसौ एतत्कर्तुं समिच्छति ॥
देव्यार्यन्त्रो महात्म्यं मुनिपरकथितं सर्वदोषादिमुक्तं
श्रुत्वा ये प्रानुमोद्य प्रमुदितवचना: श्रावयन्ति परेभ्य: ॥
ते सर्वे पापमुक्ता: सकलपरिजनै: सौख्यसंभोग गत्कृत्वा
कैवल्यं चापि प्राप्य जिनवरसद्धर्मप्राप्तिसंबोधिज्ञानं ॥

मण्डलीपरिवर्तधारिणी
(मेघसूत्रान्तर्गता)

क्रमाङ्कः च. १०३१ विषयाङ्कः १४९

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः १० ।
आकारः १२ × २¼ । ग्रन्थसंख्या ८३ । पत्रसंख्या ९ । पूर्णा ।

महज्जातकमाला

क्रमाङ्कः तृ. ७०० विषयाङ्कः १५०

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तय ८
आकारः १२ × ३¼ । ग्रन्थसंख्या ७९६८ । पत्रसंख्या ३२१ । मध्यखण्डिता ।

महज्जातकमाला

क्रमाङ्कः तृ ६४० विषयाङ्कः १५१

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ६ ।
आकारः १७½ × ५ । ग्रन्थसंख्या ७९८० । पत्रसंख्या ३२१ । पूर्णप्राया ।

आदिवाक्यम् —

ॐ नमः सर्वबुद्धबोधिसत्वश्रावकेभ्यः ॥
यःश्रीमान्भगवां छास्ता महाबुद्धो मुनीश्वरः ।
जयति शासनं तस्य सर्वत्र भुवनेष्वपि ॥
येन शास्त्रा जगल्लोकं पुत्रवत् परिपालितं ।

तदाज्ञां शिरसा धृत्वा वक्ष्येऽहं तत्सुभाषितं ॥
तं सन्तः श्रोतुमर्हन्ति सम्बोधिपदवाञ्छिनः ।
यत्संवुद्धप्रसादेन वक्ष्यामीदं सुभाषितं ।
तद्यथाभूत्महाभिज्ञो जयश्री सुगतात्मजः ।
वोधिसत्वो महासत्व सर्वसत्वहितार्थभृत् ॥
सोऽर्हत् पूरा महावौद्धे वोधिमण्डे जिनाश्रमे ।
सर्वसत्वहितार्थेन विजहार सतांधिकः ॥
तदैकसमये तत्र जयश्री सजितात्मजः ।
सभामध्यासनासीन स्तस्थौ धर्मं प्रकाशितुं ॥

पुष्पिकावाक्यानि —

इत्यशोकपरिपृच्छोपगुप्तभाषितत्रिरत्नगुणप्रथिन महज्जातकमालायां प्रथमोध्यायः समाप्तः

इति श्रीमहज्जातकमालायां त्रिरत्नसमुत्पत्तिकथाप्रवृतिर्नाम द्वितीयः

" बृहद्द्युतिदकुम्भकारावदानम्

" भगवतो दासजन्मसद्धर्मचरणावदान समाप्तं

" वोधिसत्वश्चक्रवर्ति जन्मसुगतभजनावदानं "

" सुप्रभासो जातकावदान समाप्तम्

इतिश्री महज्जातके रत्नावदानमालायां सोमजातकावदानं "

" " श्रेष्ठि जन्मावदानं "

इतिश्रीमतज्जातकमालाया, मरनेमिनो राज्ञोऽमितायुर्नामतथागत व्याकरणं समाप्तं

" अनिमिष्टराजकुमारस्य समन्तरस्म्युद्गत श्रीकूटराजनामतथागतव्याकरणं

" सुप्रतिष्ठितमणिकूटराजनामतथागतव्याकरण

" इन्द्रगणाकुमारमारस्य मञ्जुश्रीवोधिसत्व-श्रीनामतथागतव्याकरणाम

" अनङ्गकुमारस्य वज्रच्छेदप्रज्ञाप्रभाव श्रीवो-धिसत्वसमन्तभद्रतथागतव्याकरणाम्

" अभयकुमारस्य पत्रोत्तरतथागतव्याकरणाम्

" अम्वरस्य धर्मवशवर्तीश्वरतथागतव्याकरणाम्

" अङ्गराजकुमारस्य प्रभासविरजःसमुच्छ्रय गन्धेश्वरराजतथागतव्याकरणाम

" अमियस्य समन्तभद्रवोधिसत्वज्ञानवज्रवि-जृम्भितेश्वरकेतुनामतथागतव्याकरणाम्

" दशकुशोदप्राणिसहस्रतथागतव्याकरणां

" अभिद्यनाम्नो राजपुत्रस्याक्षोभ्यतथागत "

" हिमसैकुमारस्य गन्धहस्तिवोधिसत्वसुवर्ण-पुष्पनामव्याकरणाम्

" सिंह नाम्नो राजकुमारस्य नागविनर्दिते-श्वरघोषनामव्याकरणाम्

" समुद्रेश्वरभुवे रत्नकूटतथागतव्याकरम

" संभवस्य वैरोचनकुसुमतथागत "

" सामुद्ररेणोः ज्योतिर्गन्ध नाम " "

" त्रिकोटीमानवकं तथागतव्याकरणां

" वायुविष्णुब्राम्हणस्य शारेन्द्रराज "

ज्योतिष्पालस्य ककुच्छन्दतथाजतव्याकरणां समाप्तम्

" तुम्वुरो कनकमुनितथागतब्याकरणां

" विद्दु गंजकरुणाश्रयस्य काश्यपनाम "

" वैशायनस्य मैत्रेयतथागतब्याकरणाम

इति महज्जातकमालायां पञ्चमानतथागत ब्याकरणं

, महावलवेगधारिमाणावकस्य रोचनो नाम तथागतब्याकरण

" समुद्ररेणुवाह्मणस्य शाक्यमुनितथागत "

" समुद्ररेणुमहाकारुणिकवोधिसत्वशाक्यमुनि-तथागतब्याकरणपरिवर्त समाप्तः

" भगवन्समुद्ररेणुब्राह्मणजन्मावदानं समाप्त

" पुणयवलावदान समाप्तम्

" धर्माकरावदानं समाप्तम

" दूर्धनाख्यचक्रवर्तिराजवदानं समाप्तं

" प्रदोपप्रद्योतचक्रवर्तिनृपावदानं समाप्तं

" सुसिद्धार्थमतिसार्थवाहावदानं समाप्तं

